श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे दशमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे दशमोऽध्यायः ॥

श्रीशुक उवाच
अथ सिन्धुसौवीरपते रहूगणस्य व्रजत
इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषा -
न्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध
एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढु -
मलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभ -
मतदर्ह उवाह शिबिकां स महानुभावः ॥ 1 ॥

यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न
समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां
रहूगण उपधार्य पुरुषानधिवहत आह हे वोढारः
साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥ 2 ॥

अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीया -
च्छङ्कितमनसस्तं विज्ञापयां बभूवुः ॥ 3 ॥

न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव
वहामः अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति
नानेन सह वोढुमु ह वयं पारयाम इति ॥ 4 ॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां
सांसर्गिकाणां भवितुमर्हतीति निश्चित्य
निशम्य कृपणवचो राजा रहूगण उपासित -
वृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थित -
मन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव
रजसाऽऽवृतमतिराह ॥ **5** ॥

अहो कष्टं भ्रातर्व्यक्तमुरु परिश्रान्तो दीर्घ -
मध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहन -
नाङ्गो जरसा चोपद्रुतो भवान् सखे नो एवापर
एते सङ्घट्टिन इति बहु विप्रलब्धोऽप्यविद्यया
रचितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि
संस्थानविशेषेऽहम्ममेत्यनध्यारोपितमिथ्या -
प्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां
पूर्ववदुवाह ॥ **6** ॥

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच
रहूगणः किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य
भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि
चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं
स्वां भजिष्यस इति ॥ **7** ॥

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं
रजसा तमसानुविद्धेन मदेन तिरस्कृताशेष -
भगवत्प्रियनिकेतं पण्डितमानिनं स भगवान्
ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा
योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव
विगतस्मय इदमाह ॥ **8** ॥

ब्राह्मण उवाच
त्वयोदितं व्यक्तमविप्रलब्धं
    भर्तुः स मे स्याद्यदि वीर भारः।
गन्तुर्यदि स्यादधिगम्यमध्वा
    पीवेति राशौ न विदां प्रवादः॥ **9** ॥

स्थौल्यं कार्श्यं व्याधय आधयश्च
    क्षुत्तृड्भयं कलिरिच्छा जरा च।
निद्रा रतिर्मन्युरहं मदः शुचो
    देहेन जातस्य हि मे न सन्ति॥ **10** ॥

जीवन्मृतत्वं नियमेन राजन्
    आद्यन्तवद्यद्विकृतस्य दृष्टम्।
स्वस्वाम्यभावो ध्रुव ईड्य यत्र
    तर्ह्युच्यतेऽसौ विधिकृत्ययोगः॥ **11** ॥

विशेषबुद्धेर्विवरं मनाक् च
    पश्याम यन्न व्यवहारतोऽन्यत्।
क ईश्वरस्तत्र किमीशितव्यं
    तथापि राजन् करवाम किं ते॥ **12** ॥

उन्मत्तमत्तजडवत्स्वसंस्थां
    गतस्य मे वीर चिकित्सितेन।
अर्थः कियान् भवता शिक्षितेन
    स्तब्धप्रमत्तस्य च पिष्टपेषः॥ **13** ॥

श्रीशुक उवाच
एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर

उपशमशील उपरतानात्म्यनिमित्त उपभोगेन
कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह ॥ **14** ॥

स चापि पाण्डवेय सिन्धुसौवीरपतिस्तत्त्व -
जिज्ञासायां सम्यक् श्रद्धयाधिकृताधिकार -
स्तद्धृदयग्रन्थिमोचनं द्विजवच आश्रुत्य बहु
योगग्रन्थसम्मतं त्वरयावरुह्य शिरसा
पादमूलमुपसृतः क्षमापयन् विगत -
नृपदेवस्मय उवाच ॥ **15** ॥

कस्त्वं निगूढश्चरसि द्विजानां
    बिभर्षि सूत्रं कतमोऽवधूतः।
कस्यासि कुत्रत्य इहापि कस्मात्
    क्षेमाय नश्चेदसि नोत शुक्लः ॥ **16** ॥

नाहं विशङ्के सुरराजवज्रा -
    न्न त्र्यक्षशूलान्न यमस्य दण्डात्।
नाग्न्यर्कसोमानिलवित्तपा -
    स्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ **17** ॥

तद् ब्रूह्यसङ्गो जडवन्निगूढ -
    विज्ञानवीर्यो विचरस्यपारः।
वचांसि योगग्रथितानि साधो
    न नः क्षमन्ते मनसापि भेत्तुम् ॥ **18** ॥

अहं च योगेश्वरमात्मतत्त्व -
    विदां मुनीनां परमं गुरुं वै।
प्रष्टुं प्रवृत्तः किमिहारणं तत्
    साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥ **19** ॥

स वै भवान् लोकनिरीक्षणार्थ -
    मव्यक्तलिङ्गो विचरत्यपि स्वित्।
योगेश्वराणां गतिमन्धबुद्धिः
    कथं विचक्षीत गृहानुबन्धः॥ **20** ॥

दृष्टः श्रमः कर्मत आत्मनो वै
    भर्तुर्गन्तुर्भवतश्चानुमन्ये।
यथासतोदानयनाद्यभावात्
    समूल इष्टो व्यवहारमार्गः॥ **21** ॥

स्थाल्यग्नितापात्पयसोऽभिताप -
    स्तत्तापतस्तण्डुलगर्भरन्धिः।
देहेन्द्रियास्वाशयसन्निकर्षात्
    तत्संसृतिः पुरुषस्यानुरोधात्॥ **22** ॥

शास्ताभिगोप्ता नृपतिः प्रजानां
    यः किङ्करो वै न पिनष्टि पिष्टम्।
स्वधर्ममाराधनमच्युतस्य
    यदीहमानो विजहात्यघौघम्॥ **23** ॥

तन्मे भवान् नरदेवाभिमान -
    मदेन तुच्छीकृतसत्तमस्य।
कृषीष्ट मैत्री दृशमार्तबन्धो
    यथा तरे सदवध्यानमंहः॥ **24** ॥

न विक्रिया विश्वसुहृत्सखस्य
    साम्येन वीताभिमतेस्तवापि।
महद्विमानात्स्वकृताद्धि मादृ -
    ङ्नङ्क्ष्यत्यदूरादपि शूलपाणिः॥ **25** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे दशमोऽध्यायः ॥